# परिशिष्टम्

## सादरं समीहताम्

सादरं समीहताम् वन्दना विधीयताम्
श्रद्धया स्वामातृभू-समर्चना विधीयताम्॥
आपदो भवन्तु वा, विद्युतो लसन्तु वा
आयुधानि भूरिशोऽपि मस्तके पतन्तु वा
धीरता न हीयतां, वीरता विधीयतां
निर्भयेन चेतसा पदं पुरो निधीयताम्॥ ॥ सादरं ॥
प्राणदायिनी इयं त्राणदायिनी इयं
शक्तिमुक्तिभक्तिदा सुधाप्रदायिनी इयं
एतदीयवन्दने सेवनेऽभिनन्दने
साभिमानमात्मनो जीवनं प्रदीयताम्॥ ॥ सादरं ॥

## कृत्वा नवदृढसङ्कल्पम्

कृत्वा नवदृढसङ्कल्पम्
वितरन्तो नवसन्देशम्
घटयामो नवसङ्घटनम्
रचयामो नवमितिहासम्॥
नवमन्वन्तरशिल्पिनः
राष्ट्रसमुन्नतिकाङ्क्षिणः
त्यागधनाः कार्यैकरताः
कृतिनिपुणाः वयमविषण्णाः॥ ॥ कृत्वा ॥
भेदभावनां निरासयन्तः
दीनदरिद्रान् समुद्धरन्तः
दुःखवितप्तान् समाश्वसन्तः
कृतसङ्कल्पान् सदा स्मरन्तः॥ ॥ कृत्वा ॥
प्रगतिपथान्नहि विचलेम
परम्परां संरक्षेम
समोत्साहिनो निरुद्वेगिनो
नित्यनिरन्तरगतिशीलाः ॥ कृत्वा ॥

# अवनितलं पुनरवतीर्णा स्यात्

अवनितलं पुनरवतीर्णा स्यात्
संस्कृतगङ्गाधारा
धीरभगीरथवंशोऽस्माकं
वयं तु कृतनिर्धाराः॥

निपततु पण्डितहरशिरसि
प्रवहतु नित्यमिदं वचसि
प्रविशतु वैयाकरणमुखं
पुनरपि वहतात् जनमनसि
पुत्रसहस्रं समुद्धृतं स्यात्
यान्तु च जन्मविकाराः ॥ धीरभगीरथ.........॥

ग्रामं ग्रामं गच्छाम
संस्कृतशिक्षां यच्छाम
सर्वेषामपि तृप्तिहितार्थं
स्वक्लेशं न हि गणयेम
कृते प्रयत्ने किं न लभेत
एवं सन्ति विचाराः ॥ धीरभगीरथ.........॥

या माता संस्कृतिमूला
यस्या व्याप्तिः सुविशाला
वाङ्मयरूपा सा भवतु
लसतु चिरं सा वाङ्माला
सुरवाणीं जनवाणीं कर्तुं
यतामहे कृतिशूराः ॥ धीरभगीरथ.........॥

# वन्दे भारतमातरम्

वन्दे भारतमातरं वद, भारत! वन्दे मातरम्
वन्दे मातरं, वन्दे मातरं, वन्दे मातरम्॥

जन्मभूरियं वीरवराणां त्यागधनानां धीराणाम्
मातृभूमये लोकहिताय च नित्यसमर्पितचित्तानाम्।
जितकोपानां कृतकृत्यानां वित्तं तृणवद् दृष्टवताम्
मातृसेवनादात्मजीवने सार्थकतामानीतवताम् ॥ 1 ॥

ग्रामे ग्रामे कर्मदेशिकास्तत्त्ववेदिनो धर्मरताः
अर्थसञ्चयस्त्यागहेतुको धर्मसम्मतः काम इह।
नश्वरबुद्धिः क्षणपरिवर्तिनि काये, आत्मन्यादरधीः
जातो यत्र हि स्वस्य जन्मना धन्यं मन्यत आत्मानम् ॥ 2 ॥

मातस्त्वत्तो वित्तं चित्तं स्वत्वं प्रतिभा देहबलम्
नाहं कर्ता, कारयसि त्वं, निःस्पृहता मम कर्मफले।
अर्पितमेतज्जीवनपुष्पं मातस्तव शुभपादतले
नान्यो मन्त्रो नान्यचिन्तनं नान्यद्देशहिताद्धि ऋते ॥ 3 ॥

# (क) शब्दरूपाणि – संज्ञाशब्दाः

## इकारान्तः पुंल्लिङ्गः ''हरि'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | हरिः | हरी | हरयः |
| द्वितीया | हरिम् | हरी | हरीन् |
| तृतीया | हरिणा | हरिभ्याम् | हरिभिः |
| चतुर्थी | हरये | हरिभ्याम् | हरिभ्यः |
| पञ्चमी | हरेः | हरिभ्याम् | हरिभ्यः |
| षष्ठी | हरेः | हर्योः | हरीणाम् |
| सप्तमी | हरौ | हर्योः | हरिषु |
| सम्बोधनम् | हे हरे! | हे हरी! | हे हरयः! |

एवमेव मुनि, कवि, रवि, इत्यादयः।

## उकारान्तः पुंल्लिङ्गः ''भानु'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भानुः | भानू | भानवः |
| द्वितीया | भानुम् | भानू | भानून् |
| तृतीया | भानुना | भानुभ्याम् | भानुभिः |
| चतुर्थी | भानवे | भानुभ्याम् | भानुभ्यः |
| पञ्चमी | भानोः | भानुभ्याम् | भानुभ्यः |
| षष्ठी | भानोः | भान्वोः | भानूनाम् |
| सप्तमी | भानौ | भान्वोः | भानुषु |
| सम्बोधनम् | हे भानो! | हे भानू! | हे भानवः ! |

एवमेव गुरु, तरु, शिशु, साधु इत्यादयः।

### इकारान्तः स्त्रीलिङ्गः ''मति'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मतिः | मती | मतयः |
| द्वितीया | मतिम् | मती | मतीः |
| तृतीया | मत्या | मतिभ्याम् | मतिभिः |
| चतुर्थी | मत्यै, मतये | मतिभ्याम् | मतिभ्यः |
| पञ्चमी | मत्याः, मतेः | मतिभ्याम् | मतिभ्यः |
| षष्ठी | मत्याः, मतेः | मत्योः | मतीनाम् |
| सप्तमी | मत्याम्, मतौ | मत्योः | मतिषु |
| सम्बोधनम् | हे मते! | हे मती! | हे मतयः! |

एवमेव बुद्धि, गति, रात्रि इत्यादयः।

### ईकारान्तः स्त्रीलिङ्गः ''लेखनी'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | लेखनी | लेखन्यौ | लेखन्यः |
| द्वितीया | लेखनीम् | लेखन्यौ | लेखनीः |
| तृतीया | लेखन्या | लेखनीभ्याम् | लेखनीभिः |
| चतुर्थी | लेखन्यै | लेखनीभ्याम् | लेखनीभ्यः |
| पञ्चमी | लेखन्याः | लेखनीभ्याम् | लेखनीभ्यः |
| षष्ठी | लेखन्याः | लेखन्योः | लेखनीनाम् |
| सप्तमी | लेखन्याम् | लेखन्योः | लेखनीषु |
| सम्बोधनम् | हे लेखनि! | हे लेखन्यौ! | हे लेखन्यः! |

एवमेव जननी, नदी, द्रोणी, गौरी इत्यादयः।

### उकारान्तः स्त्रीलिङ्गः ''धेनु'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | धेनुः | धेनू | धेनवः |
| द्वितीया | धेनुम् | धेनू | धेनूः |
| तृतीया | धेन्वा | धेनुभ्याम् | धेनुभिः |
| चतुर्थी | धेन्वै, धेनवे | धेनुभ्याम् | धेनुभ्यः |
| पञ्चमी | धेन्वाः, धेनोः | धेनुभ्याम् | धेनुभ्यः |
| षष्ठी | धेन्वाः, धेनोः | धेन्वोः | धेनूनाम् |
| सप्तमी | धेन्वाम्, धेनौ | धेन्वोः | धेनुषु |
| सम्बोधनम् | हे धेनो! | हे धेनू! | हे धेनवः! |

एवमेव रेणु, रज्जु इत्यादयः।

## इकारान्तः नपुंसकलिङ्गः ''वारि'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वारि | वारिणी | वारीणि |
| द्वितीया | वारि | वारिणी | वारीणि |
| तृतीया | वारिणा | वारिभ्याम् | वारिभिः |
| चतुर्थी | वारिणे | वारिभ्याम् | वारिभ्यः |
| पञ्चमी | वारिणः | वारिभ्याम् | वारिभ्यः |
| षष्ठी | वारिणः | वारिणोः | वारीणाम् |
| सप्तमी | वारिणि | वारिणोः | वारिषु |
| सम्बोधनम् | हे वारे, वारि! | हे वारिणी! | हे वारीणि! |

## उकारान्तः नपुंसकलिङ्गः ''मधु'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मधु | मधुनी | मधूनि |
| द्वितीया | मधु | मधुनी | मधूनि |
| तृतीया | मधुना | मधुभ्याम् | मधुभिः |
| चतुर्थी | मधुने | मधुभ्याम् | मधुभ्यः |
| पञ्चमी | मधुनः | मधुभ्याम् | मधुभ्यः |
| षष्ठी | मधुनः | मधुनोः | मधूनाम् |
| सप्तमी | मधुनि | मधुनोः | मधुषु |
| सम्बोधनम् | हे मधो, मधु! | हे मधुनी! | हे मधूनि! |

## सर्वनामशब्दाः

## दकारान्तः पुंल्लिङ्गः ''एतद्'' (यह) शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एषः | एतौ | एते |
| द्वितीया | एतम्, एनम् | एतौ, एनौ | एतान्, एनान् |
| तृतीया | एतेन, एनेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः, एनयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः, एनयोः | एतेषु |

* सर्वनामशब्देषु सम्बोधनं न भवति।